# आधुनिकयुगे श्रीमद्भगवद्गीतगतकर्मसिद्धान्तस्य प्रसक्तिः

डा.वी.प्रमीला कुमारी

भारतीयवाङ्मये सुदीप्तम् एकं ग्रन्थरत्नं भवति श्रीमद्भगवद्गीता। समस्तभूमण्डले अस्य प्रचारः अत्यन्तं श्रेष्ठतरः भवति। प्राचीनकालादारभ्य इतः पर्यन्तं सर्वदार्शनिकप्रस्थानानां आधारो भवति प्रस्थानत्रयमिति प्रथितं श्रीमद्भगवद्गीता, ब्रह्मसूत्रम, उपनिषदः च। तेष्वग्रगण्य सुलभः तथा सुबोध च भवति श्रीमद्भगवद्गीता। सा भारतीय दर्शनशास्त्राणां मध्ये सर्वोत्कृष्ट तया विराजते इत्यत्र नास्ति संशयः। अस्यां अन्तर्भूतसिद्धान्तानां विशिष्य कर्मसिद्धान्तस्य प्रसक्तिः न केवलं भारतभूमौ, किन्तु विदेशेष्वपि परमपूजनीया भवति।

कर्मणा चित्तशुद्धिः इत्याप्तोक्त्यनुसारेण कर्म ज्ञानलाभस्य सहजोपायो यद्यपि न, तथापि परम्परया ज्ञानो त्पादहेतुरित्यङ्गीकरणात् कर्मयोगस्य प्रधानं स्थानं निश्चितम्। कर्म विना जीवनसन्धारणमप्यसाध्यमेवेति युक्त्या साधितम्। लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि (भगवद्गीता ३-२०) इत्यादिना कर्मयोगस्य स्वीकार्यता आविष्कृता। अतः व्यावहारिकजीवने कर्मयोगस्य न्यायरीत्या प्रथमस्थानं कल्पयितव्यमित्यत्र संशयलेशोऽपि नास्ति। तथैव युद्धात् निवर्तमानं अर्जुनं प्रति उपदेशद्वारेण तं युद्धे प्रवर्तयतीत्यतः गीताशास्त्रं कर्मयोगपरम् इत्यभिप्रायोस्ति। गीतायां ज्ञानध्यानभक्तिमुक्तिविभूति-विश्वरूपदर्शनादि प्रतिविषयं अध्यायाः सन्ति; तथा कर्मार्थं अध्यायत्रयमस्तीत्यतः कर्मसिद्धान्तस्य महत्त्वमुद्घोषितम्। कर्मणः विविधावस्थाः सूक्ष्मनिरीक्षणद्वारेण शास्त्ररूपेण प्रतिपादयन् एकः तत्वविचारग्रन्थः श्रीमद् भगवद्गीता एव इति मन्ये। कर्मण्येवाधिकारस्ते मा फलेषु कदाचन (२-४७) इति उद्घोषणं योगः कर्मसु कौशनम् (२ - ५०) इति निर्वचनं, नियतं कुरु कर्म त्वं (३ - ८) कर्म

ज्यायो ह्यकर्मणः इत्युपदेशः, कर्मसंन्यासात् कर्मयोगो विशिष्यते इति प्रबोधनं च एतस्योत्तमोदाहरणानि।

कर्मणामनारंभात् पुरुषः नैष्कर्म्यं नाश्नुते इत्यस्य, कर्मणामारंभात् नैष्कर्म्यं क्रमेण सिद्ध्यतीत्यर्थोप्यस्ति। कर्मानुष्ठानेनैव नैष्कर्म्यं सिद्ध्यतीति श्रु गीतायां च दृश्यते। आत्मज्ञानोपायविशदीकरणसन्दर्भे 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा........' इत्यादि वाक्येन कर्म ज्ञानहेतुर्भवति। गीताशास्त्रेपि 'संन्यासस्तु महाबाहो दुखमाप्तुमयोगतः' (श्रीमद्भगवद्गीता ५.६), योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये, यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् (श्रीमद्भगवद्गीता ५.२२) इत्यादि वचनैः ज्ञानकारण कर्म भवतीति प्रतिपादयति। अयोगतः (कर्मत्यागेन) संन्यासमाप्तुं न शक्नोति। निष्क्रियत्वेन स्थित्या न नैष्कर्म्यसिद्धिः। अतः केवलं कर्मत्यागो न, कर्मफलासक्तित्यागः एव अवश्यंभावी। परान्नभुक् रूप संन्यासिनः एव अद्य वयं पश्यामः। ते कर्माण्येव त्यजन्ति, न रागद्वेषादीन्। ईदृकर्मत्यागः अतिनिन्द्यः एव।

इदं जगतीतलं कर्मक्षेत्रमस्ति। अत्र यावन्तो सृष्टाः सन्ति, तावन्तः कर्मकरणायैव नियुक्ताः। अत्र यः निष्क्रियः स्वकर्तव्यपराङ्मुखः च भवति तस्य जीवनं न केवलं निरर्थकं प्रत्युत हानिकारकमपि। यः स्वकर्मणां सम्यग्रूपेणानुष्ठानेन पालनं करोति, स एव अस्यां कर्मभूमौ जीवितुं योग्यः। एतदुक्तं ईशोपनिषदि - 'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः' (ई-उ-२) इति। अतः स्वहिताय समाजहिताय सर्वेषां कृते स्वकर्मपालनं नितरामावश्यकं वर्तते। समाजोत्कर्षस्य मूलकारणं स्वकर्मपरिपालनमेव। बहवो विघ्नाः सन्त्यपि तान् सहमाना अपि स्वकर्मपरिपालनात् श्रेष्ठाः न विरमन्ति। अत एव भगवान् गीतायामुक्तवान् - 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' इति। श्रीमद्भगवद्गीतायां आरंभिकी कथा एव स्वकर्मपरिपालनस्यानिवार्य 'तां साधयति। उभयोरपि पक्षयोः सेना सुसज्जिता वर्तते। सेनयोरुभयोर्मध्ये स्थितान् स्वगुरुन् आचार्यान् बन्धुमित्रादीन् दृष्ट्वा विषण्णमनस्कः सन् अर्जुनः अस्त्रशस्त्रादिकं न्यस्य तूर्ष्णीं तस्थौ। एतत् क्षत्रियकुलजात स्यार्जुनस्यासमीचीनमेव। तस्मिन्समये तस्य युद्धकरणमेव कर्तव्यमस्ति। क्षत्रियो भूत्वा अक्षत्रियोचितं कातरतां कर्तुमारेभे। अतः भगवान् श्रीकृष्णः तस्मै

कर्मपालनस्य उपदेशं दत्वा रणाय समुद्यतं चकार। अत एव भगवद्गीता कर्मसिद्धान्तपरा इत्यभिप्रायोस्ति। भगवान् अर्जुनाय कर्मपरिपालनस्य उपदेशं कृतवानपि तत् केवलं न अर्जुनाय किन्तु समस्तजनानां कृते उपदेश एव। अतः कर्मसिद्धान्तस्य प्रधान्यमस्ति प्रयत्नशीनाः भारवाहकाः च मत्समीपे आगच्छन्तु इति येशुदेवस्य वचनमपि एतदेव सूचयति।

प्रपञ्चचक्रचलनार्थमपि कर्म अवश्यमेव। 'अन्नाद् भूतानि भवन्ति पर्जन्यादन्नसंभवः यज्ञात् पर्जन्यः भवति यज्ञः कर्मसमुद्भवः।' इत्येतदुक्तं गीतायां (श्रीमद्भगवद्गीता ३. २४) । एतदेव मनुस्मृतौ एवमुक्तं - अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा (म.स्मृ. ३-६३), इति। एवं प्रपञ्चस्थापनार्थं यज्ञकर्माण्युपयोज्यानि। 'न कर्मणामनारंभात्' इत्यारभ्य 'शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः' इत्यन्तेन कर्मानुष्ठानस्य आवश्यकतां समर्थयति गीताकारः। कर्माननुष्ठानेन दोषोप्यस्तीति प्रख्यापयति यज्ञार्थात्कर्मणोन्यत्र इत्यारभ्य 'मोघं पार्थ स जीवति' (श्रीमद्भगवद्गीता३/९) इत्यन्तेन लोकोपकारप्रदयज्ञकर्माननुष्ठानेन, सह इन्द्रियप्रीत्यर्थमेव जीवनं कुर्वन्ति चेत् जीवितं पापभूयिष्ठं निष्प्रयोजनं च भवति। अतः अज्ञानिना विहितं कर्मावश्यं कर्तव्यम्। ज्ञानिनापि लोकसंग्रहार्थं कर्म कर्तव्यमित्यप्युक्तम्।

लोकव्यवस्थायै कर्मपालनस्य महती आवश्यकता वर्तते। यदि जनाः स्वस्वकर्माणि न कुर्युस्तर्हि, लोकयात्रायां महती दुर्व्यवस्था समुत्पद्येत। वैयक्तिके पारिवारिके सामाजिके वा जीवने सर्वत्रापि सुखं सौभाग्यं सम्पत्तिः समुन्नतिः च कर्मणा एव भवितुमर्हन्ति। यः कर्म त्यक्त्वा तूष्णीं तिष्ठति, तस्य सर्वनाशः संभवतीत्यस्य संशयो नास्ति। अतः जीवनस्य सर्वेष्वपि क्षेत्रेषु, कर्मणः अनिवार्यता वर्तते इति सुगमतया एव बोद्धुं शक्यते। स्वकर्मानुष्ठातारः मानवाः दूरे सन्तः अपि, लोकप्रियाः भवन्ति। तदुक्तं - 'स्वानि कर्माणि कुर्वाणाः दूरे सन्तोऽपि मानवाः प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः' इति। यदि सर्वैः स्वकर्मपालनं न विधीयते तर्हि क्षणमपि सांसारिको व्यवहारः चलितुं न शक्नुयात्। यदि कुंभकारः पात्राणि न रचयेत्, रजको वस्त्राणि न प्रक्षालयेत्, सुवर्णकारो भूषणानि न घटयेत्, लोहकारो लोहकार्यं न कुर्यात्, कृषको भूमिं न कर्षयेत्, भारवाहो भारं न वहेत्, सारथिश्च शकटं न चालयेत् तर्हि सकलोऽपि

लौकिकव्यवहारः छिन्नभिन्नः, अव्यवस्थितश्च भविष्यति। कर्मपालनस्यैव आदर्श जगति उपस्थापयितुं भगवानपि अवतारं धृत्वा, विविधानि कार्याणि करोति। अत एव भगवता श्रीकृष्णेन गीतायां प्रतिपादितं - 'उत्सीदेयुरिमे लोका न कुर्या कर्म चेदहम्' (श्रीमद्भगवद्गीता ३ /२४) इति। कर्मविमुखो मनुष्यः सर्वत्रैव निराहतः सन् स्वयं तु दुःखं प्राप्नोत्येव, समाजस्यापि दुःखकारणं भवति। लोकेन सहैव तस्य परलोकाऽपि नश्यति। स इतोऽपि भ्रष्टो भवति, ततोऽपि भ्रष्टो भवति। एवं स्वकर्मपालनात् पराङ्नुखो न भवेत्। तत् परमकष्टं भति। तदुक्तं 'श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' (श्रीमद्भगवद्गीता ३/३५) इति।

जनानां स्वकर्मपराङ्नुखत्वादेव इदानीं जगति सर्वेष्वपि क्षेत्रेषु महती दुर्व्यवस्था दृष्टिगोचरा भवति। अहोरात्रं उपद्रवाः संघर्षाः कोलाहलाः कलहानि च साधारणाः। सर्वत्रैव आकुलतायाः अशान्तेः च साम्राज्यं विजृम्भते। कक्ष्यायां छात्राणां पुरतः एव गुरुन् अपि घ्नन्ति। सकलश्च संसारो नरक इव महाभयंकरः क्लेशकरश्च संवृत्तो वर्तते। एतत् सर्वमपि सर्वे एव जनाः अनुदिनं प्रत्यक्षीकुर्वन्ति। अत्र कारणं स्वकर्मपालनस्य अभाव एव तथैव परकर्मपालनं च भवति। शासकाः प्रजाजना वा अध्यापकाः विद्यार्थिनो वा अधिकारिणो अधिकृता वा सर्वे एव अज्ञानवशात् लोभवशात् ईर्ष्यावशात् द्वेषवशात् क्रोधवशात् वा स्वर्मपालनात् च्युताः, परकर्मपरायणाश्च जाताः। नेश्वरे भयं वर्तते, न लोकलज्जा अस्ति। यथेमाचरन्ति यथेच्छं व्यवहरन्ति च। मनुष्याः पशुभ्योऽपि नीचतां गताः। रक्षकाः भक्षकाः संवृत्ताः। धर्मस्थानेषु अधर्माचरणं भवति। नेतारः स्वार्थवशात् लोकवञ्चनां कुर्वन्ति। एवं भारतजनतायाः भारतसंस्कारस्य च सांस्तारिकच्युतिरेव अद्यत्वे वयं पश्यामः। 'पश्वादिभिश्चाविशेषात्' इति श्रीशङ्करवचनस्य नूतनं प्रकरणमेतत् पुरो दृश्यते। तस्य प्रथमतया प्रधानकारणं स्वकर्मोपरमः परकर्मप्रवेशनं च। स्वकर्मोपरमेन स्वसंस्कारनाशो भवति, स्वसंस्कारनाशात् जनतायाः अपि नाशः संभवति, तत् भारतभूमेः अवस्थितेरपि प्रतिबन्धो भवति। अतः अस्मिन् आधुनिकयुगे श्रीमद्भगवद्गीतासन्देशस्य विशिष्य कर्म-सिद्धान्तस्य महती प्रसक्तिः।।

**सहायक ग्रन्थाः**

१. श्रीमद्भगवद्गीता - शांकरभाष्य हिन्दी - अनुवाद - सहित, श्रीहरिकृष्णदास् सगोयन्दका, गोरखपूर, १९८८

२. श्रीमद्भगवद्गीता - श्रीमधुसूदनसरस्वतीकृत - 'गूढार्थ दीपिका' संस्कृत टी. कायुत हिन्दी व्याख्या विभूषिता, चौखम्भा संस्कृत संस्थान १९९९

3. Gopinathan Nair. N. - Manusmrithi, Vidyarambha Publishers Alleppey. 1997

4. Pathikonda Viswambara Nath - Tat Tvam Asi - The Universal Message in the Bhagvad Gita Vol. 1 Motilal Das Publishers, Private Limited Delhi.

5. Radhakrishnan. S. - The Bhagavad Gita, Blackie & Son Publishers Pvt. Ltd. Blackie House, Bombay

6. Radhakrishnan. S. - The Bhagvad Gita, George Allen & Unwin Ltd., London, 1970.

7. Radhakamal Mukharjee - Bhagvad Gita - Beyond the Religions. B.R. Publishing Corporation Delhi - 110035

8. Robert N. Minar - Modern Indian Interpreters of the Bhagvad Gita. Sri Satguru Publications Delhi - India.

9. Satya. P. Agrawal. Urmila Agarwal - The Social Message of the Gita Symbolized as Lokasamgraha. Columbia, Maryland. 21044. U.S.A.